Shri Sudarshanachakra Kavacham

# श्रीसुदर्शनचक्रकवचम् ६

## Document Information

Text title : Shri Sudarshanachakra Kavacham

File name : sudarshanachakrakavacham6.itx

Category : vishhnu, dashAvatAra, kavacha, viShNu

Location : doc_vishhnu

Proofread by : M K Barman

Description/comments : nRRisiMhakosha 2 upAsanA khaNDa

Latest update : August 4, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 4, 2025

*sanskritdocuments.org*

# श्रीसुदर्शनचक्रकवचम् ६

श्रीगणेशाय नमः । श्रीलक्ष्मीनृसिंहो जयति ।
ॐ अस्य श्रीसुदर्शनकवचमन्त्रस्य अहिर्बुध्न्यऋषिः ।
अनुष्टुभ् छन्दः । श्रीनृसिंहो देवता । क्ष्रौं बीजम् ।
हुं शक्तिः । फट् कीलकम् । सर्वोपद्रवनाशनार्थे जपे विनियोगः ।
अथ षडङ्गन्यासः ।
अथ करन्यासः ।
ॐ आचक्राय अङ्गुष्ठाभ्यां नमः ।
ॐ विचक्राय तर्जनीभ्यां नमः ।
ॐ सुचक्राय मध्यमाभ्यां नमः ।
ॐ असुरान्तकचक्राय अनामिकाभ्यां नमः ।
ॐ सर्वलोकरक्षणचक्राय कनिष्ठिकाभ्यां नमः ।
ॐ सुदर्शनचक्राय करतलकरपृष्ठाभ्यां नमः ।
अथ हृदयादिन्यासः ।
ॐ आचक्राय हृदयाय नमः ।
ॐ विचक्राय शिरसे स्वाहा ।
ॐ सुचक्राय शिखायै वषट् ।
ॐ असुरान्तकचक्राय कवचाय हुं ।
ॐ सर्वलोकरक्षणचक्राय नेत्रत्रयाय वौषट् ।
ॐ सुदर्शनचक्राय अस्त्राय फट् ।
अथ दिग्बन्धः ।
ॐ आचक्राय लं ऐन्द्रिं दिशं बन्धयामि स्वाहा ।
ॐ विचक्राय रं आग्नेयीं दिशं बन्धयामि स्वाहा ।
ॐ सुचक्राय टं याम्यां दिशं बन्धयामि स्वाहा ।
ॐ असुरान्तकचक्राय क्षं नैरृतीं दिशं बन्धयामि स्वाहा ।
ॐ सर्वलोकरक्षणचक्राय वं वारुणं दिशं बन्धयामि स्वाहा ।

ॐ नृसिंहचक्राय अं अधरां दिशं बन्धयामि स्वाहा ।
ॐ सहस्रां हुं फट् स्वाहा ॥

इति दिग्बन्धः ॥

ॐ नमो भगवते वासुदेवाय सुदर्शनदुःखं दारय दारय दुरितं हन हन पापं मथ मथ अन्तर्भवादि ज्वरमाहेश्वर, ज्वरब्रह्मज्वर, विष्णुज्वर, भुतज्वर, विषमज्वर, वातज्वर, श्लेष्मज्वरांश्च चकाहि कव्यकल्पादिक चातुर्थिक पक्षमास-त्रैमासिक षाण्मासिक सन्ततज्वर सन्निपातकान्ततापास्मारादिकान् सर्वज्वरान् छेदय छेदय छिन्धि छिन्धि आरोग्यं कुरु कुरु । ह्रां ह्रां ह्रां ह्रीं ह्रीं ह्रीं हुं फट् स्वाहा ॥

ॐ नमो भगवते सुदर्शनचक्राय महास्त्रराजाय, सर्वभूतेभ्यो भयं नाशय नाशय । शिरशूलाक्षिशूल कर्णशूल कण्ठशूल हृदयशूल बाहुशूल कुक्षिशूल कटिशूल अङ्गशूल लिङ्गशूल योनिशूल सर्वाङ्गशूल वातशूल पित्तशूल श्लेष्मशूल आदि सर्वशूलान् निर्मूलय निर्मूलय । दानव दैत्य कामिनी वेताल ब्रह्मराक्षस छायाग्रहादि सर्वग्रहान् छिन्धि छिन्धि भिन्धि भिन्धि । भस्मीकुरु भस्मीकुरु । परमन्त्रान् परयन्त्रान् परतन्त्रान् छेदय छेदय । ह्रां फट् । हुं फट् स्वाहा ॥

ॐ नमो भगवते महागरुडध्वजाय एतद्धि सर्वज्वरभयं चक्रेण छिन्धि । भिन्धि भिन्धि । शङ्खचक्रगदापद्मैः सर्वभयं हन हन । नाशय नाशय मां रक्ष । सर्वरक्षाकवचमाज्ञापय । हुं फट् स्वाहा ॥

ॐ नमो भगवते सुदर्शनमन्त्रराजाय गन्धर्वयक्षराक्षसभयं छिन्धि छिन्धि । विदारय विदारय । परमन्त्रान् ग्रासय ग्रासय । परयन्त्रतन्त्राणि दुष्टचेटककरण महामारीवेतालभूतप्रेत पिशाचादीन् भक्षय भक्षय । आचक्राय विचक्राय सुचक्राय असुरान्तकचक्राय सर्वलोकरक्षणचक्राय सुदर्शनचक्रायास्त्रराजाय हुं फट् स्वाहा ॥

ॐ नमो भगवते महासुदर्शनचक्राय ज्वालादित्यरूपाय सर्वतो मां रक्ष रक्ष । महाबलाय ज्वालापरिवर्तिन् क्ष्रौं सर्वग्रहान् हन हन हुं फट् स्वाहा ॥

ॐ नमो भगवते अस्त्रराजाय क्ष्रौं द्रीं नृसिंहाय क्ष्रौं देवदानव दैत्यपूजिताय प्रदीप्त कोट्यादित्यसहस्रसमतेजसे करालदंष्ट्रायुधाय विकीर्णकेसरसटाय क्षुभितमहावर्गभेरीदुन्दुभिनिर्घोषाय सर्वमन्त्रोच्चारणहृदयाय पाहि पाहि भगवन् नरसिंह पुरुषवर परब्रह्मसनातन शीघ्रं दह दह । पच पच । मथ मथ । घोषय घोषय निकृन्तय निकृन्तय । तावत्समागत पातालेभ्यः फट् असुरेभ्यः । फट् जिन्वजातिभ्यः फट् मन्त्रजातिभ्यः फट् सर्वान् मन्त्रान् भक्षय भक्षय । नरसिंहविष्णो सर्वपातालेभ्यः सर्वपापग्रहेभ्योपद्रवेभ्यः सर्वमन्त्रभिद्भ्य रक्ष रक्ष । अं आं ह्रीं क्ष्रौं हुं फट् स्वाहा ॥

ॐ नमो भगवते महावीर अघोर नारसिंह महाबलमहापराक्रमाय मदनहन्त्रे अघोरकालान्तक शाकिनी डाकिनी मारिमहामारिभूत प्रेतपिशाचरक्षांसि अन्तरिक्षयक्षिणी जलयक्षिणीस्थलयाक्षिणी यक्षराक्षसगन्धर्व ब्रह्मराक्षसवेतालयमदूत मन्त्रग्रहादि सर्वशूलरूपादिकान् दूरस्थान् समीपस्थान् भूतभविष्यवर्तमानदिवाचरान् मध्याचरान् रात्रिचरान् जलस्थान् स्थलस्थान् बालग्रहान् पूतनास्फोटनग्रहान् उदरस्थान् ग्रहान् सर्वान् नाशय नाशय दह दह हन हन पच पच मर्दय मर्दय खादय खादय क्षोभय क्षोभय त्रोटय त्रोटय छिन्धि छिन्धि भिन्धि भिन्धि भेदय भेदय ग्रासय ग्रासयं त्रासय त्रासय जृभस्व जृभस्व नुद नुद सुद सुद मोहय मोहय प्रसभावय प्रसभावय शोषय शोषय अघोरनारसिंह अघोरमूर्तें अगोरभैरव महावीरहनुमन्त सर्वसत्त्वान् बन्धय बन्धय टं हुं फट् स्वाहा ॥

ॐ नमो भगवते अघोरनारसिंह त्रिभुवनाधीश्वर महाभीमपराक्रम विधाभूत प्रेतपिशाचशाकिनीडाकिनी यक्षराक्षसयमदूतब्रह्मराक्षसकालभैरवकल्पान्तनानायक्षिणीकापालिकग्रहान् मर्दय मर्दय बन्धय बन्धय भक्षय भक्षय मारय मारय छेदय छेदय मथ मथ खादय खादय क्षोभय क्षोभय स्तम्भय स्तम्भय परकृतमन्त्रयन्त्रतन्त्रचेण्टकपुतलिकादिकान् विध्वंसय विध्वंसय नाशय नाशय टः टः टः टः हुं फट् स्वाहा ॥

ॐ नमो भगवते रामदूत महाभयनिवारक भूतप्रेतपिशाचादि ग्रहान् ब्रह्मराक्षसादि ग्रहान् नाशय नाशय । महाभीमपराक्रमाय कृतमन्त्रयन्त्रतन्त्रचेटकपुतलिकादीन् दूरस्थान् परदेशस्थान् ग्रहस्थितान् सव्याधिस्थितान् बहिर्भूमिस्थितान् उपवेशस्थितान् अमूर्तस्थान् सूत्रकृतान् वस्त्रकृतान् अन्नकृतान् काष्ठकृतान् वर्मकृतान् पाषाणकृतान् रोमकृतान् केशकृतान्मृत्तिकादिकृत्तिकादिकृतान् जीवविशेषकृतान् औषधादिसुलभकृतान् जीवविशेषघटाकारान् कबन्धाकारान् पीडाकारान् जलस्थान् अन्तरिक्षस्थान् वृक्षावलन्नमानान् नगरस्थितान् रुद्रभूमिस्थान् नानाकाररूपाकारान् नानादैवतविकारान् नानाबलिभक्षकान् शरीरस्थदाहशोककारकान् वायुसंज्ञकान् शूलसंज्ञकान् गतिछेदकारकान् रक्तशोषकान् मांसभक्षकान् कुण्डलाकृतकारकान् तीक्ष्णशूलकारकान् एकाङ्गहारकान् कपिशूलकारकान् यन्त्रप्रच्छेदकारकान् परस्परग्रहचमूकारान् नानावर्णान् सर्वचेतकान् नामसमानगतान् तद्भयवेदनान् नाशय नाशय बन्धय बन्धय खादय खादय ग्रासय ग्रासय शोषय शोषय मथय मथय छेदय छेदय भेदय भेदय भीषय भीषय मर्दय मर्दय सेवस्व सेवस्व घातय घातय शस्त्रकीधाढलीकीरणमुदाटय मुदाटय अचरेण त्रासय त्रासय मोचय मोचय तान् सर्वान्रुद नद सदस्कर्थेन भस्मीकुरु कुरु भो रामदत्तवीक्ष्यं ठ ठ ठ ठ हुं फट् स्वाहा ॥

ॐ नमो भगवते अघोरेश्वर महाभयनिवारणाय अघोरमूर्तये अघोर भैरवाय परकृत मन्त्रयन्त्रपतन्त्रकृतचेतकं बन्धय वस्त्रचेटकपुतलिका चेटक पुतनादीन हन हन भिन्धि भिन्धि छिन्धि छिन्धि उच्चाटय उच्चाटय चटकबन्धकेशचटककर्म चटकवस्त्र चटकमृत्तिका

चटकगोमय चटक अन्न चेटकचेटशूलान् नाशय नाशय परदेशस्थित चेटकान् नाशय नाशय समीपस्थचेटकान् नाशय नाशय ग्रहस्थित चेटकान् नाशय नाशय नाकान् नानाकृतिकारमारकचेटकान् शीघ्रं नाशय नाशय छेदय छेदय खादय खादय नानाबलिदान भक्षक छेदकचेटकान् उद्घाटय उद्घाटय नानाछेदकारकचेटकान् भस्मीकुरु कुरु ह्रां ह्रां ह्रां हुं हुं हुं फट् स्वाहा ॥

ॐ नमो भगवते महागरुडाय एत्येहि आवेशय आवेशय दुष्टराक्षसान् छिन्धि छिन्धि महागरुडास्त्राय दुष्टज्वरभूतप्रेतपिशाचब्रह्मराक्षसादिकृतां व्यथां छिन्धि छिन्धि महागरुडाय बन्ध बन्ध हुं फट् स्वाहा ॥

इति सुदर्शनसंहितायां सुदर्शनकवचं सम्पूर्णम् ।

Proofread by M K Barman

*Shri Sudarshanachakra Kavacham*

pdf was typeset on August 4, 2025

Please send corrections to *sanskrit@cheerful.com*